श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीचक्रराजमङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीचक्रराजमङ्गळम् ॥

मङ्गळं चक्रराजाय महनीयगुणाब्धये।
पद्मनाभकराम्भोज परिष्काराय मङ्गळम्॥ १ ॥

काशीविप्लोषकाराय कल्याणगुणशालिने।
मालिप्रमथनायास्तु महाधीराय मङ्गळम्॥ २ ॥

गजेन्द्रार्तिहरायास्तु ग्राहद्वेधात्वकारिणे।
दिनाधीशतिरोधानकर्त्रे दीप्ताय मङ्गळम्॥ ३ ॥

चित्राकारस्वचाराय चित्तनिर्वृतिकारिणे।
नरकासुरसंहर्त्रे नानारूपाय मङ्गळम्॥ ४ ॥

चण्डास्त्रांचितदोर्दण्डखण्डितामरशत्रवे।
चामीकरनिभाङ्गाय चारुनेत्राय मङ्गळम्॥ ५ ॥

चैद्यासुरशिरोहर्त्रे चन्द्राह्लादकराय ते।
श्रीमते चक्रराजाय श्रितार्तिघ्नाय मङ्गळम्॥ ६ ॥

॥ इति श्रीचक्रराजमङ्गळं संपूर्णम् ॥

www.prapatti.com